> भूयो विधाय विनयं विनिवेदयामि ।
> भ्रान्त्या यदत्र गदितं वितथं विधिज्ञैः
> सद्भिस्तदेव दयया परिशोधनीयं ॥
> श्रीमुग्धबोधं बहुभिर्बहुसेवितं (!) ।
> मया तु तेषां संस्पृष्टमस्पृष्टमुपनीयते ॥

इह खलु माहेशभाष्यपाणिनीयादिव्याकरणावलोकनाद्बहुतरतया तत्र तत्र प्रवृत्तिमलभमानानां नानादिग्देशीयशिष्याणां झटिति प्रवृत्तिमुद्भाव[य]न् संक्षेपेण व्याकरणं चिकीर्षुर्वोपदेवः प्रारिप्सितग्रन्थसमाप्तिं प्रति परिपन्थिप्रत्यूहध्वंसपटीयसि हरिहरेष्टदेवताप्रणामरूपमाचरन् शिष्यशिक्षायै परहिताय च निबध्नाति मुकुन्दमित्यादि । ०

Of other commentators three are referred to in the chapters on *saṃjñās* and *sandhi* (ends fol. 19); viz. *Durgādāsa-tarkavāgīśa*, fol. 13; *Madhusūdana* (*bhaṭṭācārya*), 13. 16; *Vidyānivāsa*, 13.

The lacuna between foll. 46 and 48 comprises the comment on *sūtras* 165-171 of the 3rd chapter (or the end of the *hasantādhyāya*).

The *kāraka* section (v.) beg. fol. 54*b*:

> मुखराजीवनिस्यन्दसुधातिभरतुन्दिला ।
> ममानन्दं मुकुन्दस्य करोतु रेणुका कली ॥

The *samāsa* section (vi.) fol. 79*b*:

> समासव्यासव्याख्यायामकिंचनजनाश्रयः ।
> श्वान्तरायकलध्वंसी भूयान्मे मधुसूदनः ॥

The *taddhita* section (vii.) fol. 98*b*:

> तद्धितार्थस्य व्याख्यायां कृष्णपादारविन्दकं ।
> विघ्नान्निहन्तु सततं संसारध्वान्तनाशनं ॥

The MS. breaks off abruptly in the comment on *sūtra* 51 of this chapter.

[H. T. COLEBROOKE.]

872.

1287. Foll. 73; size 13 in. by $4\frac{1}{2}$ in.; fairly good, recent Bengālī handwriting; five, sometimes six, lines in a page.

Kāśīśvara's Mugdhabodha-pariśishṭa.

It begins:

> नत्वा पदाम्बुजमशेषगुणैकसिन्धो
> रामस्य वीक्ष्य मुनितन्त्रमशेषतश्च ।
> श्रीवोपदेवकविना कृतमुग्धबोधे
> काशीश्वरो वितनुते परिशिष्टमेतत् ॥

ऋतो रलावॄऌतोर्लुक् च वा ॥ ऋकारस्य ॠॡतोः परयो रलौ यथासंख्यं वा भवतो लुक् च वा । पितॄणां होत्ऌतकौ । कश्चिद् रलावादिश्य परयोर्दीर्घमाह । पितॄणां होत्ॡतकौ (? तॄ) । पितॄणां होतॄतकौ । पितृऋणां होतृऌतकौ । पितृणां होतृतकौ । ०

The *sandhiprakaraṇa* ends fol. 10; *ṇatvapr.*, fol. 14; *shatvapr.*, fol. 17*b*; *kāraka*, fol. 33*b*; *samāsa*, fol. 44; *taddhita*, fol. 50*b*; *iti--tyādyanta-prakaraṇam; atha kṛidantāḥ pariśishyante*, fol. 64.

It ends: सृप्धनोरिसुस् । सर्पिर्घृतं । धनुरस्त्रविशेषः ॥ कृपेर्नुक् । कृष्णः ॥ हृञ इः । हरिः ॥ इति श्रीकाशीश्वरभट्टाचार्यकृतमुग्धबोधपरिशिष्टं समाप्तं ॥

[H. T. COLEBROOKE.]

873.

803b. Foll. 36; size 16 in. by 5½ in.; indifferent, recent Bengālī handwriting; eight lines in a page.

Mugdhabodhapariśishṭa, another supplement to the first seven chapters (or the *sandhi* and noun sections) of the *Mugdhabodha*, by *Nandakiśoraśarman Bhaṭṭācāryacakravartin.* It begins:

प्रणम्य गौरीचरणौ सुरार्चितौ बहून्निबन्धानवलोक्य यत्नतः ।
सुमुग्धबोधे परिशिष्टमुच्यते समासतो नन्दकिशोरशर्मणा ॥

ऋतो रल ऋॡति लुक् च वा ॥ ऋॡतोः परयोर्ऋतः स्थाने क्रमेण रलौ स्यातां लुक् च वा । धात्रृद्धिः (!) धातृद्धिः । होत्ॡकारः होतॢकारः । पक्षे धातृृद्धिः होतृृकारः ॥ इको ऽसर्वे ऽचि यल न ॥ इकः स्थाने यल न वा स्यादसर्वे ऽचि परे न इत् । दधियत्र मधुवत्र इत्यादि °

The *sandhiprakaraṇa* ends fol. 3*b*; *śabdaprakaraṇa*, fol. 6*b*; *ṇatva,* fol. 7*b*; *shatva*, fol. 9; *strītya*, fol. 10*b*; *kāraka,* fol. 16; *samāsa*, fol. 30*b*. It ends:

प्रियाद्वा ॥ इमनन्तः प्रियः पुंलिङ्गे वा स्यात् । प्रेमा प्रेम । स्वार्थे प्रत्ययान्तानां क्वचिल्लिङ्गान्तरत्वमभिधानात् । यथा त्रिलोकी एव त्रैलोक्यं । मुक्ता एव मौक्तिकं ॥ इति श्रीनन्दकिशोरभट्टाचार्यचक्रवर्तिकृतौ मुग्धबोधपरिशिष्टे तद्धितप्रकरणं समाप्तं ॥

गगणनयनकालक्ष्मामिते शाकवर्षे
गतवति हरिमर्के पक्षतावन्यपक्षे ।
तुहिनशिखरिपुत्रीपादपद्मं प्रणम्य
प्रततमिदमशेषं ज्ञानदं पाठकानां ॥

If this date (Śaka 1620) does not refer to the composition of the work, it must be that of a former manuscript. No name of any other commentator on *Mugdhabodha* has been met with up to the end of the *kāraka* section.

For another MS. of the greater portion of this work, viz. the *kāraka, samāsa* and *taddhita* sections, see Rāj. Mitra, Notices, vi., p. 276.

[H. T. Colebrooke.]

874.

987a. Foll. 52; size 14¼ in. by 4½ in.; fair, recent Bengālī handwriting; seven lines in a page.

Uṇādikoshaṭīkā, a commentary on *Rāmaśarman's Uṇādikosha*, by *Rāmatarkavāgīśa.*

It begins:

ब्रह्मादिदेवासुरवृन्दवन्दिते पद्मालये शाश्विसरोजराजिते ।
कन्दर्पदर्पान्तकपादनीरजे सन्तु प्रणामा वरदोहदव्रजे ॥
भगवान् पाणिनिर्यानि फणी कात्यायनादयः ।
उज्जहुस्तानि रूपाणि तन्यन्ते रामशर्मणा ॥

उणादयो बहुलमिति श्रीमद्भगवतः पाणिनेः सूत्रं तस्य सूत्रस्य प्रकृतिप्रत्ययोरूपपदस्य चागमादेशह्रस्वदीर्घकार्याणि प्रत्ययस्य चानुबन्धकार्याणि बाहुल्याद्भवन्तीति भाष्यादिभिर्व्युत्पादितं ॥ नाम्न्यन्ये तिक् चेति श्रीवोपदेवेन सूचितं (xxvi. 43) तस्यायमाशयः । °

The section on suffixes beginning with consonants, begins fol. 35*b*.

It ends:

हसादित्यान्तकाण्डे ऽत्र कृतः श्रीरामशर्मणा ।
नानाशास्त्रं समालभ्य बालानां बुद्धिवृद्धये ॥

अजादित्यान्ताः ॥ १४९ । ७८ ॥ २७ ॥ श्तिपधोर्निर्देशे इश्च किद्वहुलं । भवतिः अत्तिः दीव्यतिरित्यादि । यजिः रञ्जिः रजिरित्यादि ॥ तत्तद्भ्यस्तत्तद्विकरणानि ॥ भूतनुदिवसुतुदरुध-क्र्यादिभ्यः शपशुपश्यनश्नुशश्नमनश्ना एते क्रमात् स्युः धुनिर्देशे ॥ हसादित्यान्ताः ॥ cf. Aufrecht, Cat. Bodl., no. 399.

[H. T. Colebrooke.]

875.

1417. Foll. 38; size 12½ in. by 3¼ in.; well written, in the Bengālī character; four lines in a page.

Kavikalpadruma, a *Dhātupāṭha* in *anushṭubh ślokas*, in which the roots are arranged alphabetically according to their final letter; by *Vopadeva.*

See Westergaard's Radices Linguæ Sanscritæ, pref., p. v; Weber, Cat. Berl., no. 790; Aufrecht, Cat. Bodl., no. 397.

It ends:

इति स्फीतः सप्तदशशत्या षड्ढीनषष्ट्या । १७५४ ।
धातुस्कन्दैर्बुधाः सेव्यः कविकल्पद्रुमः फलन् ॥

विद्वद्धनेशशिष्येण भिषक्केशवसूनुना ।
तेन वेदपदस्थेन वोपदेवद्विजेन यः ॥

Editions have been published at Calcutta in 1866 and 1872. [H. T. COLEBROOKE.]

876.

2739. Foll. 64; size $7\frac{1}{2}$ in. by 6 in.; well written, in Devanāgarī, by *Lālā Mahtāb Rāy*; bound in the European style.

Kavikalpadruma, arranged alphabetically according to the final letter of the roots, each root with its Sanskrit (and to some extent, its English) equivalents occupying a separate line.

It ends: ज्येष्ठे मासि कृष्णपक्षे पंचम्यां तिथावर्कजवासरे विचित्रं धातुपाठो महतावरायेनेदं च्चित्रितं शुभं भूयात् ॥

स्वर्गे गीर्वाणनार्थः सुरपतिमभितः शाब्दिकानां वरेण्यं
पाताले नागराजं भुजगयुवतयो यस्य गायन्ति कीर्तिम् ।
यत्तीर्थः शब्दपाथोनिधिमखिलमिमं गोष्पदं वा सुराद्रौ
शिष्यो कार्पद्विनेशः कविकुलतिलकः केशविर्वोपदेवः ॥

After this follow the *sautras*.

For an index of the roots contained in this work, likewise arranged according to the final letter, see no. 687 (MS. 434*a*, appendix). [SIR CHARLES WILKINS.]

877.

779. Foll. 84; size 10 in. by 4 in.; clear Devanāgarī writing of the early part of last century; 6–8 lines in a page.

Vopadeva's Kāvyakāmadhenu, a commentary on the author's *Kavikalpadruma*, the text of which is likewise given in full.

The MS. [A] begins:

येनाऽविषयद्भिकरणैराख्यातैर्धातुलोहितैः * ।
प्रकाशः संप्रकाश्यंते क्रियास्तं स्तौमि † गोपतिं ॥ १ ॥

* येन विषयद्भि° B.; येन त्विय° आख्यातधातु° Oxf. MS.

† नौमि B. O.

कविकल्पद्रुमं धातुपाठं विवरितुं निजं ‡ ।
धातुवृत्तिः काव्यकामधेनुर्नाम विधीयते § ॥ २ ॥
तत्र प्रयोगा धातूनामक्रमादित्फलार्थिकाः || ।
शश्निपोत्स्वनितां तुल्यप्रयोगाणां सभेदकाः ॥

तत्रादौ ग्रंथकृदुचितेष्टदेवतामादित्यमुपास्ते । शब्दाकरकरग्रामम्° ॥

अथ पूर्वाचार्यान् जयवादेन धिनोति ।

इंद्रश्चंद्रः काशकृत्स्नापिशली शाकटायनः ।
पाणिन्यमरजैनेंद्रा जयंत्यष्टादिशाब्दिकाः ॥

अथ ग्रंथस्वरूपं निरूपयति ।

मतानि तेषामालोच्य सर्वसाधारणः स्फुटः ।
धातुपाठः स्वदाद्याद्यक्रमादंतादिमक्रमः ॥
कविकल्पद्रुमो नाम पद्यैर्निष्पाद्यते ऽत्र च ।

स्वदाद्याद्यक्रमादंतादिमक्रमः। आकार आद्यो येषां धातूनां ते°

The MS. is not quite complete at the end; one leaf being wanting which ought to contain the end of the *sautrāḥ*, and the comment on the concluding *ślokas*, and which has been replaced by a leaf containing the colophon. Fol. 74 has been supplied by a still more recent hand.

Cf. Rāj. Mitra, Notices, ii., p. 194; Aufrecht, Cat. Bodl., no. 398. [H. T. COLEBROOKE.]

878.

346*a*. Foll. 86; 4to; size $11\frac{1}{2}$ in. by 9 in.; large Bengālī handwriting; nine lines in a page; European paper (watermark 1805).

Kāvyakāmadhenu [B.]. The roots and meanings of the *dhātupāṭha* are marked with red chalk; the introductory *ślokas* of the text are not given in full. [H. T. COLEBROOKE.]

879.

726a. Foll. 70; size $12\frac{1}{2}$ in. by $4\frac{1}{2}$ in.;

‡ मया O.; विवरितं मया B.

§ नामाभिधीयते B. O.

|| read धातूनामित्क्र°

good, recent Bengālī handwriting; seven lines in a page.

[*Kavikalpadruma-ṭīkā*], a more diffuse commentary on *Vopadeva's Dhātupāṭha*, by *Rāma Rāma Nyāyālaṃkāra.* Incomplete. It begins:

सजलाम्भोदतुल्याभां ब्रह्मादिसुरसेवितां ।
सच्चिदानन्दरूपां तां नमामि परदेवतां ॥
श्रीगुरोश्चरणाम्भोजमानम्य कवितुष्टये ।
कविकल्पद्रुमव्याख्या रामरामेण तन्यते ॥

ग्रन्थारम्भे प्रतिबन्धकत्वरितपरिहरणकाम: श्रीमन्निहिरमुपास्यत्वेन स्तौति । शब्दाकरेति°

The MS. extends to the end of the णान्तवर्ग: ।

Among the authorities quoted may be mentioned *Goyīcandra, Tarkavāgīśa* (*Mugdhabodhaṭīkā*), *Trilocana, Durga, Bhaṭṭamalla, Maitreya, Vistaravṛitti.* [H. T. COLEBROOKE.]

880.

418. Foll. 120; size 11½ in. by 9½ in.; fairly good, modern Devanāgarī writing; 14–17 lines in a page; bound in the European style.

Dhātudīpikā, another commentary on *Vopadeva's Kavikalpadruma*, by *Durgādāsaśarman*, son of *Vāsudeva Sarvabhauma Bhaṭṭācārya.* The MS. begins:

नत्वा श्रीशगिरीशौ श्रीदुर्गादासशर्मणा क्रियते ।
कविकल्पद्रुमटीका धातुदीपिका नाम (!*) ॥
कति कति सन्त्यपि सन्त: सन्तोषं नो भजन्त इतरगुणे ।
ये परगुणलवलुब्धा दुर्गादासश्रमो भवत्तेभ्य: ॥
सुखाय छात्रवर्गाणामत्रेति परिभाष्यते ।
अन्तस्था: स्युर्यरलवा अ आ इत्यादय: स्वरा: ॥
जम्माणा: स्यु: शषसहा अन्त्यात् प्रागुपधा भवेत् ॥

श्रीवोपदेवो धातुपाठं चिकीर्षु: प्रारिप्सितसमाप्तये शिष्टाचारप्राप्तं मङ्गलमाचरति ॥ °

It ends:

शाके सोमरसेषुभूमिगणिते श्रीसार्वभौमात्मजो
दुर्गादास इमां चकार विशदां टीकां स्वबोधावधि ।
टीकेयं विशदात्मनां प्रतिपदं संपादयन्तो मुदं
शिष्याणां विदधातु धातुगहने शार्दूलविक्रीडितं ॥
सर्वस्वं मौग्धबोधानामन्येषामिव कांचनं ।
कविकल्पद्रुमस्याग्रे दीप्यते धातुदीपिका ॥

इति वासुदेवसार्वभौमभट्टाचार्यात्मजश्रीदुर्गादासशर्मविरचिता धातुदीपिका नाम कविकल्पद्रुमटीका समाप्ता ॥

The commentary was accordingly written in Śaka 1561 (=A.D. 1639). Westergaard, Radices, p. vii., makes it Śaka 1581 (=A.D. 1659) taking रस as 8).

A leaf at the end contains a list of the authorities quoted in the work from which we extract the following †:

Amaraṭīkā, fol. 106; *Ālaṃkārika*, 37b; *Udbhaṭaśloka*, 49; *Kādambinī*, 17b; *Kirātam*, 116; *Kīcakayamaka*, 13; *Kulacandra*, 116b; *Kramadīśvara*, 6b; *Kriyānighaṇṭa*, 18b; *Gadasiṃha*, 29; *Goyīcandra*, 9b; *Govardhana*, 33b; *Govindabhaṭṭa*, 14b; *Caṇḍeśvara*, 89; *Caturbhuja*, 14b; *Jaṭādhara*, 21b; *Trilocana*, 11; *Durga*, 21; *Dhātupārāyaṇa*, 5; *Dhātupradīpa*, 21; *Pāṇinīya-vṛitti*, 15b; *Bhaṭṭamalla*, 14b; *Bhīma*, 50b; *Mayūrabhaṭṭa*, 73; *Maitreya*, 22; *Raghu*, 21; *Ramānātha*, 13b; *Rāma*, 19; *Vidyānivāsa*, 43b; *Vaidyakam*, 33b; *Śabdamahārṇava*, 117b; *Śabdākara*, 1, *Śaraṇadeva*, 37; *Sāhityadarpaṇa*, 117b; *Subhūti*, 51b.

[H. T. COLEBROOKE.]

881.

1172E. Foll. 28; size 13¼ in. by 4¼ in.; fairly written, in the Bengālī character; seven lines in a page.

---

* A MS. of this work, described in Rāj. Mitra's Notices, iii., p. 232, begins:

नत्वा शङ्करचरणसरोजे श्रीदुर्गादासेन धीमता ।
विदधे धातुदीपिका नाम टीका कविकल्पशाखिन: ॥

The concluding *śārdūlavikrīḍita* stanza, containing the date of the work, is not given in that description.

† The numbers refer to the first quotations from the respective works and authors.

Dhāturatnākara, a metrical arrangement of the roots according to the final (and initial) letters, composed, apparently in imitation of the *Kavikalpadruma*, by *Nārāyaṇa*, in Śaka 1586 (or possibly 1576), A.D. 1664 (1654).*

It begins:

वन्दे वन्दे पदद्वन्द्वं श्रीरामस्य दयानिधेः ।
पद्यैर्विधीयते धीरा धातुरत्नाकरो मया ॥
वर्णक्रमकृताद्यं तु परिपाट्याः समीरिताः ।
गणसूत्रसूत्रलोकागमोक्ता इह धातवः ॥
अत्र नेङादिकं कार्यमनुबन्धादिहेतुना ।
बोध्यं सर्वैरियं यस्मात्सर्वसाधारणी कृतिः ॥
परो ऽनुबन्धः सर्वेषां समानवाक्यशालिनां ।
न तथा पौनरुक्ते तु परोक्तानां न मध्यमः ॥
अत्र यादृच्छिको ऽकारो न निष्ठायामिङादितां ।
आरम्भे च तथा भावे विहितायां विभाषया ॥ °
नुम् स्यादिदनुबन्धानां न निष्ठायामिङीदितां ।
वाक्यायामुदितामिङ् स्यात् सर्वस्मिन्नूदितां तथा ॥
ऋदितामनि ह्रस्वो न ॠदितां स्याद्विभाषया ।
ऌगूदितां वेरितां स्यादवृद्धिरेदितां सङि ॥
ऐदितां स्याद्यजादित्वं निष्ठास्तन ओदितां ।
औकारानुबन्धकानां शकादित्वं समीरितं ॥
किशुरादिर्यजादि कोत् क्रियादिर्गोनुबन्धकः ।
ण्यादिश्च ग्यनुबन्धः स्यात् पूर्वजं स्वादिरेव सः ॥
घानुबन्धो रुदादि स्यात् ङितां स्यादात्मनेपदं ।
कर्तरि ञानुबन्धानां तत्कर्त्रर्थक्रियाफले ॥
उभयानुबन्धकानां हुमित्ययं समीरितः ।
ञितां क्तो वर्तमाने तु टोकारेतां ज्वलादितां ॥
ट्वथुड् भवेद् टुकारेतां तुकारेतां त्रिमक् तथा ।
षीकारेतां फलादित्वं जक्षादिस्तानुबन्धकः ॥
दानुबन्धस्तनादिः स्यात् धानुबन्धो रुधादिकः ।
स्वादिः स्यान्नानुबन्धस्तु मुचादिः पानुबन्धकः ॥
भानुबन्धः शमादिः स्यात् घटादिर्मानुबन्धकः ।
मीद्भिकत्वं यकारे तु दिवादीर्मिददादिकः(!) ॥
लुकारे तु स्वपादिश्च वानुबन्धो वृदादिकः ।
षोकारे तु जुहोत्यादिस्तुदादिर्होनुबन्धकः ॥
ऋनुबन्धः कुटादिश्च वैदिका रानुबन्धकाः ।
आङ्भवेत् षानुबन्धानां ञादयः ष्यनुबन्धकाः ॥
धृङादयः षुकारे तु तः स्यादिर्मनुबन्धकः(!) ।
क्रादि कृगृदृधृपृञः खमितः स्युः सुपादयः ॥
ठिन्मुहादिर्द्युतादिस्तु ङ ऌकारानुबन्धकः ।
अनुस्वारानुबन्धा ये ते विज्ञेया अदन्तकाः ।
चुरादयोदिते(!) बोध्या मृषत्वरहिता पुनः ॥

इति परिभाषा† ॥

अर्थेङसौ याचने स्यात् अङ्काङ्कं पदचिह्नयोः ।
अंशांसं द्वौ समाघाते स्यादन्धं दर्शनक्षये‡ ॥
अवधीरं तु रीढायाम् अघं पापकृतौ मतः ।
आन्दोलं दोलनार्थो ऽसौ स्यादूनं परिहानके ॥
स्यादोजं वलतेजो ऽर्थः कथं वाक्यप्रबन्धके ।
कत्रे कत्रं त्रयः कर्तं शैथिल्यार्थाः समीरिताः ॥ °

इत्यकारान्तवर्गः fol. 4; आदन्तवर्गः fol. 4b; इकारान्तवर्गः ib.; etc. हान्तवर्गः fol. 28b; सौत्रवर्गः fol. 29.

शाकाब्दे रसनागरोपरजनीनाथैर्मिते माधवे
श्रीरामस्य पदारविन्दयुगलं ध्यात्वा चिरं निर्मितः ।
ग्रन्थो ऽयं शशिराजिमैत्रगणितैः संदर्भे ते धातवः
श्रीनारायणशर्मणा परमतो बोध्यं प्रयोगात्सतां ॥

इति श्रीनारायणवन्द्यनिर्मितो धातुरत्नाकरः समाप्तः ॥
प्राणकान्तारपाथेयं संसारच्छेदभेषजं ।
दुःखशोकपरित्राणं हरिरित्यक्षरद्वयं ॥ श ° १७२७ ॥

[H. T. Colebrooke.]

882.

1282b. Foll. 40; size 13 in. by 4½ in.; fair, recent Bengālī handwriting; seven or eight lines in a page.

Śabdarūpaprakāśikā, being a collection of declensional paradigms, according to the *Mugdhabodha*.

It begins:

श्रीरामचरणौ नत्वा नामानि लिखति क्रमात् ।
शब्दानामज्झसन्तानां रूपाण्यल्पधियां कृते ॥

---

* The date (A.D. 1805) given erroneously by Westergaard, Radices, p. vii, for the composition of the work, is that of the present MS.

† For the corresponding verses of the *Kavikalpadruma* see Westergaard, Radices, p. 343.

‡ The corresponding verse of the *Kavikalpadruma* runs thus:

अङ्काङ्कत् क पादलक्ष्मण्यंशाशत् क विभाजने ।
अर्थेत् क याचने ऽन्धत् क दृक्क्षये ऽघत् क तत्कृतौ ॥

रामशब्दः श्रीरामबलरामपरशुरामवाची । रामः रामौ रामाः ० ।

The *ajantādhyāya* ends fol. 18.

[H. T. COLEBROOKE.]

---

8. SAUPADMA.

883.

75. Foll. 200; size 17½ in. by 3 in.; well written, in the Bengālī character; six lines in a page.

Supadma, a Sanskrit grammar, in aphorisms, with brief explanations; by *Padmanābhadatta* (son of *Dāmodaradatta*).

Adhyāya I., on *saṃjñās* and *sandhi*, begins:

प्रणम्य परमं देवं देवीं वाचमृषीन् गुरून् ।
पद्मनाभः स्फुटं पूर्णं भाषायामाह लक्षणं ॥

अथ विवरणं च तस्य शब्दानुशासनेन सह पाणिनीयादिशब्दस्मृतौ रूपलक्षसौकर्योपाधये । प्रतिसंस्कृतस्य शब्दलक्षणस्य तत्रादौ वर्णोपदेशः शास्त्रप्रयोगाय । अ इ उण् ऋ लृक् ए ओङ् ऐ औच् ॥ आदिरितान्त्येन समध्यः । आदिर्वर्णो ऽन्त्येन इता णकारादिना इत्संज्ञकेन सह संगृह्यमाणः समध्यो ग्राह्यो भवति । अणित्युक्ते अकारइकारउकारा गृह्येरन् ० ॥ here follow a few more *sūtras*: अचो ऽन्ये हल् ॥ खयादिद्वयं वर्गस्य ॥ तृतीयो जस् ॥ तुर्यो झष् ॥ ङम् पञ्चमः ॥ झय् वर्णो ऽङम् ॥ यवरलो यण् ॥ शषसाः शर् ॥ खर् खयशरौ ॥ खरुज्झितो हल् हस् ॥ ङम्यणहीनो झल् ॥ अशहौ यय् ॥ यंङमो ऽनुनासिका(ः) ॥ वर्ग्यैस्वरौ सजातीयैः सवर्णौ ॥ ०

A. II., on *kāraka* and declension, beg. fol. 22: कारके॥ अधिकारो ऽयं। क्रियानिमित्तं कारकं कर्त्रादि। ०

A. III., on conjugation, beg. fol. 53: गुप्तिजकिद्भ्यः सन् बहुलं। गुपादिभ्यो धातुभ्यः सन्प्रत्ययो बहुलं भवति । ०

A. IV., on *krit* (and *uṇādi*) suffixes, beg. fol. 98*b*: कृद्बहुलं ।

A. V., on *taddhitas*, fol. 141*b*: तद्धिते ॥ अधिकारो ऽयं ॥ णिति वृद्धिरचामादेः । ०

It ends:

वन्द्यश्रीयुक्तराधाचरणवटुबुधस्तस्य पाठाय पुस्तीं
यत्नादेनां व्यलेखीत् चरणपरपदं पार्वतीपूर्वशब्दं ।
यस्याभ्यासो ऽपि विप्रो नयनविधुमुनिक्षोणिकासंख्यशाके
मासे मेषस्थसूर्ये तिथिममदिवसे शुभ्रपक्षे ऽर्कवारे ॥

शकाब्दाः १७१२ ॥ [H. T. COLEBROOKE.]

884.

904. Foll. 199; size 15¼ in. by 5 in.; Bengālī character, for the most part indifferently written, by three or four recent hands; 7 or 8 lines in a page.

The same work. [H. T. COLEBROOKE.]

885.

903. Foll. 318; size 15 in. by 5 in.; transcribed, in the Bengālī character, by four different, recent hands; 7-10 lines in a page.

The *Supadma-makaranda*, a commentary on the *Supadma*, by *Vishṇumiśra*; in 20 sections (*vindu*), of which there are found four in each adhyāya.

This MS. wants the third adhyāya.

It begins:

गौरीचरणसरोजं स्फुरदनुरागं भजामि भक्तेषु ।
आसाद्यास्मिन् मानसमखिलाभीष्टं जनो ऽभ्येति ॥
यच्चिन्ताभ्यसनाज्जन्तोः क्षीयन्ते तमसां चयाः ।
उदेति परमं ज्योतिर्ज्योतीरूपं नतो ऽस्म्यहं ॥
अपारभवकान्तारविघ्नवारणकारणं ।
हेरम्बस्य पदाम्भोजं भजामो ऽभीष्टसिद्धये ॥
यस्याः प्रसादमासाद्य वाचस्पतिरपश्चिता ।
अशेषजननीमाद्यां भारतीमानतो ऽस्मि तां ॥
दुरूहं पद्मनाभस्य वचनं विवृणोमि यत् ।
क्षन्तुमर्हन्ति तत्सन्तो यूयमत्र परीक्षकाः ॥

अथेहाशेषविशेषपदेषु विभ्रान्तानन्तजन्तुसंतानोपचिकीर्षया व्याकरणं चिकीर्षुः परमकारुणिको ग्रन्थकृत् सकलशिष्टाचारानुमितवेदप्रामाण्यात् प्रत्यूहव्यूहवारणकारणमभीष्टदेवताप्रणतिलक्षणं मङ्गलं प्रणीय शिष्यान् शिक्षयिष्यन् तत्संबन्धं पद्यं प्रथमं निबबन्ध प्रणम्येत्यादि । ०

Adhyāya I., ends fol. 47b; II., fol. 118; IV., fol. 203.

It ends: वदादयः सप्तविंशत्प्रत्यया अव्ययसंज्ञा इत्यर्थः॥ शिवमेतत् सर्वं॥ इति श्रीसुपद्ममकरन्दप्रकाशे विंशतितमो विन्दुः॥

[H. T. COLEBROOKE.]

886.

1479. Foll. 85; size 15½ in. by 5½ in.; clearly written, in the Bengālī character, by three modern hands; seven or eight lines in a page.

Adhyāya III. (*vindus* 9-12) of the *Supadma-makaranda*; being the section on the verb.

[H. T. COLEBROOKE.]

887.

1160a. Foll. 32; size 14 in. by 5 in.; fair, modern Bengālī handwriting; eight lines in a page.

Samāsa-saṃgraha, a versified summary of the chapter on compounds of the *Supadma*, by the physician *Rūpanārāyaṇa Sena*; with a commentary by *Vishṇumiśra*. The treatise begins:

प्रणम्य वाणीश्वरणारविन्दं
विचित्रशोभं नखरेन्दुभाभं।
नृणां मनोऽभीष्टफलप्रदायि
ज्ञानार्थमेवाशुतरं शिशूनां॥ १॥
पद्मेन सौपद्मसमाससूत्रं
संग्रथ्य वृत्त्या परितत्य तस्य।
कार्यः पयोग्रामकृतालयेन
श्रीरूपनारायणसेनकेन॥ २॥ ० ३॥
समर्थानां समासः स्यात् सुप्सुपाधिकृतं त्वतः।
बाव्यस्तत्पुरुषात्पूर्वमव्ययीभावसंज्ञकः॥

The text, the three introductory *ślokas* of which are not commented upon, ends fol. 3. The commentary begins:

समर्थानां समासः स्यादस्यार्थः। परस्परसंबन्धार्थानां पदानां समासो वेदितव्यः। समसनं समासः संक्षेप इत्यर्थः। ०

It ends:

मनःसंस्पर्शमात्रेण निर्मलं कुरुते ऽधिकं।
विष्णुमिश्रोद्भवा टीका गङ्गेव सुखदायिनी॥

तस्य साफल्यभावेन दातुं शक्नोति को ऽपि न।
स्वल्पपात्रे निधायाम्बु सर्वे एव तदर्हति॥
अकरोत् संग्रहं शाके पृथ्वीखाब्धिवियन्मिते।
पयोग्रामनिवासी श्रीरूपनारायणो भिषक्॥

This would give Śaka 1701 (A.D. 1779)—hardly Śaka 1401 (A.D. 1479)—for the date of *Rūpanārāyaṇa's* composition. [H. T. COLEBROOKE.]

888.

1160c. Foll. 23; size 14¼ in. by 5 in.; fairly written, in the Bengālī character, by two recent hands; 5-9 lines in a page.

Supadma-shaṭkāraka, a metrical summary of the *kāraka*-chapter of the *Supadma*, by *Rūpanārāyaṇa Sena*; with a commentary. The MS. begins:

अर्चोन्यस्तसहस्रसंख्यकमले न्यूनैकके तत्क्षणात्
यच्चोत्पाट्य निजाक्षिपद्ममकरोत् साहस्रमस्याच्छतः (?)।
तच्छम्भोश्चरणं प्रणम्य विमलं सौपद्मषट्कारक-
व्याख्यानं तनुते भिषग् बुधमतः श्रीरूपनारायणः॥
षट् कारकाणि संबन्धो विभक्तीनां च निर्णयः।
वक्ष्यानि समासेन शिशूनां बोधहेतवे॥
लिपिं वीक्ष्य बुधानां यः प्रबन्धः क्रियते मया।
तत्र दोषे समाधानं कुर्वन्तु शास्त्रकोविदाः॥
क्रियानिमित्तं यदि कारकं स्यात्तदास्य संबन्धिनि लक्षणस्य।
भवेदतिव्याप्तिरिहेश्वरादौ पचत्यसौ तण्डुलसीश्वरस्य॥
अस्यार्थः॥ यदि क्रियानिमित्तं कारकमिति सामान्यलक्षणं क्रियते ०

It ends: कृदन्तात् प्रत्ययान्तरे षष्ठी न भवितव्यमिति न तद्धितप्रयोगे इत्यादिदृष्टिः॥ इति सुपद्मषट्कारकं समाप्तं॥

[H. T. COLEBROOKE.]

889.

1160d. Foll. 45; size 14 in. by 4¾ in.; recent Bengālī handwriting; seven lines in a page.

Śabdāvali, a versified summary of the chapter on declension of the *Supadma*, by *Rāmabhadra Nyāyālaṃkāra*.

It begins:

नौमीशकान्ताचरणाम्बुजद्वयं
विधीशमानाथसुरेन्द्रवन्दितं ।
वाल्मीकिना रामगुणो निवेदितो
निषेव्य यत्प्राथमिकेन धीमता ॥
ज्ञानदं श्रीगुरोः पादं प्रवन्द्य धरणीसुरः ।
शब्दावलिं शावकृते रामभद्रस्तनोतकि ॥
प्रतीता बालबोधिन्यां कातन्त्रप्रक्रिया यतः ।
सुपद्मप्रक्रिया तस्माद्रामभद्रेण तन्यते ॥

The outer page contains the title: कविचन्द्रकृतसुपद्मसंमतशब्दावली ॥ [H. T. COLEBROOKE.]

890.

802a. Foll. 36; size 16 in. by 5½ in.; fairly written, in the Bengālī character, by two recent hands; eight, sometimes seven, lines in a page.

Padmanābhadatta's Paribhāshā, or general rules on the application of the author's grammatical *sūtras,* with a commentary.

It begins:

हरिं प्रणम्य गोपालं श्रीदत्तात्मजसूनुना ।
द्विजश्रीपद्मनाभेन परिभाषा विभाष्यते ॥

तथा हि । सूत्रेष्वेव हि तत्सर्वं यद्वृत्तौ यच्च वार्त्तिके ।
सूत्रं योनिरिहार्थानां सर्वं सूत्रे प्रतिष्ठितं ॥

येन केनचिद्व्याख्यातुकामेनावश्यमेवाभ्युपगन्तव्यं । तथा चार्थतः । अर्थान् सूचयति सूत्रयति सूत्रे वा । सूत्रमिह भगवानाचार्ये इह पञ्चकसुपद्मे ऽर्थाभिधानमभिहितं । सूत्रावलोकनात् तदिह संक्षिप्याभिधीयते । परितः सर्वतो भाष्यन्ते ऽर्था आभिरिति परिभाषाः । ० ॥ असति बाधे ॥ अस्यार्थः ॥ इत्यधिक्रियते । असति बाधे बाधविरहे परिभाषान्यायः प्रवर्त्तते । ० ॥ here follow a few more *paribhāshās*: सविशेषणे विधिनिषेधौ विशेषणमुपसंक्रामतो विशिष्ये बाधिते सति ॥ एकदेशविकृतमनन्यवत् (*Paribhāshenduś.* no. 37) ॥ नाखशब्दोत्कान्त् ॥ येन विधिस्तदन्तस्य (*Pāṇ.* I. 1, 72) ॥ न संज्ञाविधौ ॥ विशेषनिषिद्धानां सामान्यनिषेधपरात्वं ॥

The work concludes with the following *ślokas,* in which the author gives an account of his literary activity up to that time:

नत्वा श्रीश्रीनिवासं प्रणतजनमनःशङ्कुसंहारकालं
सन्यासशमवस्तमन्तदमनं श्रीगोपालदेवेशं प्रभुं(!) ।
पाणिन्यादिप्रणीतान्यतिविमलधिया शब्दशास्त्राणि दृष्ट्वा
पूर्णं मुक्तं सदार्थातमनगुरुमयाविष्कृतं तूर्णमेतत् ॥
दिङ्मात्रं दर्शितं किंतु सकलार्थविकाशनं ।
धैर्यावधेयं धीराः श्रीपद्मनाभनिवेदितं ॥
उक्तो व्याकरणादर्शः सुपद्मस्तस्य पञ्जिका ।
ततो हि बालबोधाय प्रयोगाणां च दीपिका ॥
उणादिवृत्ती रचिता तथा च धातुकौमुदी ।
तथैव यंलुको(!) वृत्तिः परिभाषा ततः परं ॥
गोपालरचितं नाम साहित्ये ग्रन्थरत्नकं ।
आनन्दलहरीटीका टीका माघे विनिर्मिता ॥
छन्दोरत्नं छन्दसि च स्मृतावाचारचन्द्रिका ।
कोषे भूरिप्रयोगाख्यो रचिता तातयत्नतः [? l. रचितान्यतियत्नतः] ॥ ० ॥

इति श्रीपद्मनाभदत्तकृता परिभाषा समाप्ता ॥

[H. T. COLEBROOKE.]

891.

1480. Foll. 45; size 16 in. by 5½ in.; fairly good, modern Bengālī handwriting; eight lines in a page.

Uṇādivṛitti, a collection of aphorisms on the formation of words derived by means of *uṇādi* suffixes, with a commentary, by the author of the *Supadma, Padmanābhadatta,* son of *Dāmodaradatta* (and grandson of *Śrīdatta*).

The work begins:

प्रणम्य गोपीजनवल्लभं हरिं
सुपद्मकारेण विधीयते ऽधुना ।
अचो ऽन्त्यकादिक्रमतो ऽन्त्यहलन्तयोर्
उणादिवृत्तेरिति सारसंग्रहः ॥
बुधैरुणादेर्बहुधा कृतो ऽस्ति यो
मनीषिदामोदरदत्तसूनुना ।
स पद्मनाभेन सुपद्मसंमतं
विधिः समग्रः सुगमं समस्यते ॥

अथेष्टसिद्ध्यर्थमिष्टदेवतावन्दनापूर्वककार्यमाह । गोपीजनवल्लभं प्रणम्य इदानीं सुपद्मकारेण उणादिवृत्तिरिति सारसंग्रहो विधीयते ॥ इतिशब्दः प्राकाश्ये । केन प्रकारेण । अचो ऽन्त्य

अचरूपं प्रत्ययमुक्त्वा ततः पश्चादजन्ते हलन्ते च प्रत्यये कादिक्रमतः कादिक्रमेण इति । - - । रूढिशब्दाः पृषोदरादिपाठे निरुक्तसिद्धाः । ०

The work consists of two chapters (*pāda*), of which the first treats of vowel-affixes, beginning with *u, ū, a, ā*, etc.; the second of consonantal affixes (first the monosyllabic, then the polysyllabic ones), arranged alphabetically according to the final consonant. Cf. Th. Aufrecht, *Ujjvaladatta*, p. xxi. The first two *sūtras* उणादयो बहुलं ॥ कादिभ्य उण् ॥ are identical with those of the resp. chapters of the *Supadma* (iv. 2), but afterwards there are not many coincidences.

[H. T. COLEBROOKE.]

892.

1475d. Foll. 33; size 15½ in. by 5 in.; modern Bengālī handwriting; eight lines in a page.

Śabdābdhitari, a glossary of words formed with *uṇādi* affixes, by *Rāmagovinda* (*dharāmara*), son of *Rūpanārāyaṇa cakravartin*.

It begins (with the numbers supplied):

उन्मत्तदैत्यगणसन्यमनन्यहार्यं
विश्वम्भराभवनमोहितमात्मरूपं ।
दामोदरं दरविकस्वरसारसाक्षं
लक्ष्मीपतिं त्रिजगतीगतिमानतो ऽस्मि ॥ १ ॥
अच्युतस्य विमलं पुनः पुनः पादपद्मयुगलं नमस्यता ।
शब्दशास्त्रविदुषां मुदे मया शब्दसागरतरिर्विधीयते ॥ २ ॥
अत्र शिष्टानुशिष्टत्वाद्वसमानामदन्तता ।
क्वचिन्न कार्यसमये त्वन्तायादि न पूर्वभाक् ॥ ३ ॥
आदौ प्रत्ययमद्रूपमुक्त्वाजन्तहसन्तयोः ।
कादिक्रमेण कथयाम्युणादीन् प्रत्ययानहं ॥ ४ ॥
पृषोदरादौ चिह्नविस्तत्र सिद्धा निरुक्तितः ।
रूढिशब्दाः प्रपठ्यन्ते यदिच्छालक्षणान्विताः ॥ ५ ॥ ०
कारुः कार्यं करोतीति स्मृतः शिल्पिनि कारके ।
वातीति वायुः पवनः चरुश्चारु मनोहरं ॥ १४ ॥

The vowel-affixes, treated of in the first *vicitra*, end fol. 8; when the consonantal affixes follow in alphabetical order: fol. 10*b*, *iti kāntavargaḥ*, etc. [H. T. COLEBROOKE.]

893.

218. Foll. 136; size 15 in. by 5 in.; at first well, afterwards fairly, written, in the Bengālī character (but without diacritic *r*-point); by two modern hands.

Dhātupāṭha to the *Supadma*; with a commentary, called *Dhātunirṇaya* (?).

I. Foll. 15 (122–136); eight lines in a page. The *Dhātupāṭha*. It begins:

भू सत्तायां । पा पाने । घ्रा गन्धोपादाने । ध्मा शब्दाग्निसंयोगे । ष्ठा गतिनिवृत्तौ । म्नाभ्यासे । दाण् दाने । इ गतौ । केचिदिदं दीर्घान्तं पठन्ति । जि जये । क्षि क्षये । जि ज्रि अभिभवे । सु द्रु गतौ । षु प्रसवैश्वर्ययोः । श्रु श्रवणे । ध्रु स्थैर्ये । दु द्रु गतौ । ऋ गतिप्रापणयोः । गृ घृ सेचने । सृ गतौ । स्मृ चिन्तायां । ह्वृ कौटिल्ये । ध्वृ हूर्च्छने । ० - *iti parasmaibhāshāḥ*, fol. 4*b*; *ātmanebhāshāḥ*, fol. 6*b*; *ubhayabhāshāḥ*, fol. 7; *dyutādayaḥ*, fol. 7*b*; *vṛitādayaḥ*, *ghaṭādayaḥ*, *phalādayaḥ*, *jvalādayaḥ*, *yajādayaḥ*, इति शविकरणा भ्वादयः समाप्ताः fol. 8*b*; अशविकरणा अदादयः fol. 9, etc.

It ends: वर्ण वर्णक्रियाविस्तारवचनेषु । क्षप प्रेरणे । लाभ इत्येके । अघ पापक्रियायां । परस्मैभाषाः । वृह स्वार्थे णिजन्ताश्चुरादयः समाप्ताः ॥ The back of the last leaf contains the title, in Devanāgarī, सुपद्मको धातुपाठः ० श्लो ३३९ ॥

II. Foll. 1–121; seven lines in a page. *Dhātunirṇaya*; wanting the *curādi* section.

It begins:

अज्ञानतत्त्वमिश्रं हिनस्ति पङ्क्तिर्नखेन्दूनां ।
यस्मिंस्तदेव गौरीचरणाम्भोजं मुहुः स्तौमि ॥
प्रत्यूहव्यूहविध्वंसिदशनस्य गणेशितुः ।
पदारविन्दमद्वन्द्वसाधनं सततं स्तुमः ॥
धातूनां निर्णयः शब्दभिषजामपि दुष्करः ।
अतस्तन्निर्णये यत्नः सुधीभिः सुविधीयते ॥

894.

671a. Foll. 25; size 12¾ in. by 6¼ in.; good modern Bengālī handwriting (the same as that of 671*b*–*d*); ten lines in a page.

Gaṇapaṅktikā, a metrical arrangement of the *Dhātupāṭha*, by an unknown Brāhman (*dharāmara*), the son of *Sundara* and *Jayā*.

It begins:

प्रणम्य राघवं रामं जानकीकमलां सतीं ।
श्रीविष्णूक्तं गणं ब्रूयाज्जयासुन्दरजः शुभं ॥
कृताञ्जलिरहं सो ऽपि युष्मान् वच्मि धरामरः ।
सर्वान्दोषान्परित्यज्य ग्राह्या मे गणपङ्क्तिका ॥
व्याकरणं पुराणानि साहित्यं पठिता स्मृतिः ।
एता विद्यासु शिक्ष्यन्ते विद्वत्पादाः प्रवेदिताः ॥
विद्वत्पादान्नमस्ये वै पुटाञ्जलिरहं मुहुः ।
पाठनीयाः सदा बाला ममेमां गणपङ्क्तिकां ॥
वर्णस्यासंभवात्कश्चिद्वर्णभेदः समुच्यते ।
लघुर्यत्र गुरुस्तत्र लघुस्तत्र प्रकीर्त्यते ॥
छन्दोभङ्गं भवेत्क्वापि अपाण्डित्यं भवेन्महत् ।
तदपि स्वीकृतं विद्वद्बालानां बोधनाय मे ॥
भ्वाद्यदादिर्जुहोत्यादिर्दिवादिस्स्वादयो गणाः ।
तुदादिश्च रुधादिश्च तनुक्र्यादिश्चुरादयः ॥
सत्ताल्लज्जास्थितिजागरणं वृद्धिक्षयभयजीवितमरणं ।
शयनक्रीडारुचिदीप्त्यर्था नैते कर्मणि धातव उक्ताः ॥

अथ गणपङ्क्तिका लिख्यते ॥ अजन्तधातवः कथ्यन्ते ।

पा पाने धेट् पिबत्येव धयति ध्मा च शब्दने ।
धमति अग्निसंयोगे गन्धोपादे च जिघ्रति ॥
म्ना ष्ठा गतिनिवृत्तौ च तिष्ठति म्ना मनत्यपि ।
अभ्यासे यच्छतीत्येव दाने दानविदां मतं ॥
हर्षक्षये ग्लायति ग्लै म्लै [च]म्लायति इत्यपि ।
गात्रस्यापि विनामे ध्यै न्यक्कारे ध्यायति स्वपे ॥ °

अथ इकारान्ताः fol. 2, etc.

It ends:

आकारादिश्चकारान्तो गण उक्तः श्रीविष्णुना ।
क्रमेण कथयितुं हि जयासुन्दरजः शुभं ॥

इति चुरादिगणसमाप्तः ॥

The treatise appears to be identical with the *Dhātugaṇa*, described by Dr. Rāj. Mitra, in his Descript. Cat. i., p. 35 (which does not seem to contain the introductory *ślokas* 2–5); where, however, he reads the author's name *Jayasundarāja*, and identifies the *śrī-Vishṇu* referred to with *Vishṇumiśra*, the author of the *Supadmamakaranda*. The present MS. is followed by three treatises belonging to *Pītāmbara's Sārasaṃgraha*, copied by the same scribe; and may perhaps have been intended to serve as a *Dhātupāṭha* for that grammar. [H. T. Colebrooke.]

---

9. Minor Grammars, and Miscellaneous Treatises.

895.

2812. Foll. 96; folio; size 12¾ in. by 4 in.; well written, in Devanāgarī, by *Lālā Mahā Barūya*, of Benares; about 30 lines in a page; European paper.

Prayoga-ratnamālā, a grammar in *ślokas*, accompanied by a *vṛitti*, composed, in A.D. 1772, under the auspices of *Malla Naranārāyaṇa Deva*, by *Purushottamaśarman Vidyāvāgīśabhaṭṭācārya*.

It begins:

श्रीनन्दसूनोर्वदनारविन्दम्
उपास्महे यत्र नितान्तमेव ।
स्फुरच्छ्रुतीनां परमं रहस्यं
स्मितश्रियानन्दमयं विभाति ॥ १ ॥
अमृताधिकमाधुरी धुरीणा
धरणियां सगुणोर्जितेन वेणोः ।
रणितेन जगन्ति रञ्जयन्तं
भगवन्तं घनकान्तिमन्तमीडे ॥ २ ॥
श्रीमल्लदेवस्य गुणैकसिन्धोर्
महीमहेन्द्रस्य यथानिदेशम् ।
यत्नात्प्रयोगोत्तमरत्नमाला
वितन्यते श्रीपुरुषोत्तमेन ॥ ३

महतामपि हृद्विभावनीयैर्
महनीयैर्गुणवृद्धिमत्प्रयोगैः ।
रचितां पुरुषोत्तमेन बालां
प्रतिभायै परिधत्त रत्नमालाम् ॥ ४ ॥
दर्भोदंराङ्कुरधियः सुधियः प्रसाद्य
विज्ञापये यदहमत्र मनो निधत्त ।
एतेषु मद्वचनकैरवकोरकेषु
युष्मत्प्रसादशरदिन्दुरुचः स्फुरन्तु ॥ ५ ॥

अकारादिक्षकारान्ता वर्णमालानुवर्तते ।
स्वरादिसंज्ञा विधानार्थम् ।
उक्तः क्षो वर्णमालायां मन्त्वस्योपचिकीर्षया ॥
कादिसंयोगसंकेतविषयं कश्चिदाह तम् ।
अत्र संख्याविधानानुपयुक्तो ऽपि अकारः पाणिनीयवर्णक्रमव्यवच्छेदार्थः ।
तस्यामकारादौकारं यावद्वर्णाः स्वरा अचः ॥
स्वरसंज्ञका अच्संज्ञकाश्च भवन्ति । °
अकाराद्य लृदन्ताः समानाः स्युरकश्चते ।
संज्ञाफलम् अकाम् ऋकारे ह्रस्वः स्यात्°
सस्थानाकौ सवर्णः स्यात् सावर्ण्यम् ऋलृवर्णयोः ।
अ इ उ ऋ लृ ह्रस्वाः स्युर्लघवश्चैकमात्रकाः ।
अन्ये स्वरा दीर्घसंज्ञा ज्ञातव्यास्ते द्विमात्रकाः ॥ °

I. *Sandhi* and *Subanta*:

Iti svarasamjñāprakaraṇam, fol. 1*b*; *svarasandhi*, fol. 2*b*; *svarasandhinishedha*, fol. 3; *vyañjanasandhi*, fol. 4; इति° संधिविन्यासः प्रथमः fol. 5; *svarāntasādhyaprakaraṇa*, fol. 11; *vyañjanadeśa*, fol. 14; *avyayaprakaraṇam*, fol. 20*b*, etc.; *shatvaprakaraṇam*, fol. 24*b*; इति° प्रकीर्णविन्यासश्चतुर्थः । fol. 25*b*; कारकमाला, fol. 34*b*; समासविन्यासः षष्ठः fol. 44.

अवहेलितभीमविक्रमश्रीनरनारायणदेवदेशितेन ।
गुणवद्धिततद्धितप्रबंधो रचितः श्रीपुरुषोत्तमेन तेन ॥ १ ॥
समाहृतं व्याकरणाभिरूपा ऽकूपारपारात्पुरुषोत्तमेन ।
प्रयोगचिंतामणिमामनंतः प्रयोगचिंतामणयो भवंतु ॥ २ ॥
प्रालेयाद्रिसुतापदाब्जयुगलं वन्दारुणा संततं
व्यालेखि द्विजकुंजरेण रचिता रत्नादिमाला शुभा ।
वेदव्याकरणर्त्तुभुजाङ्किरणेयुक्तेश्च भूमिद्युपट् (!)
श्रीलश्रीपुरुषोत्तमेन महता शाके शनौ वासरे ॥ ३* ॥

इति° तद्धितप्रकरणं (तद्धितविन्यासः सप्तमः MS. 466) fol. 58*b*.

II. *Ākhyāta* begins:

श्रीयदुमणिगुरुचरणस्फुरदरविन्दालिवन्दारुः ।
श्रीपुरुषोत्तमशर्मा लौकिकपदमञ्जरीं तनुते ॥ १ ॥
दाक्षायणीयमतकात्यसुतप्रबन्ध-
मल्लानुरञ्जितगुणा पदमञ्जरीयम् ।
आदीयतां श्रवसि निःश्रमवस्यतायै
व्युत्पत्तिपङ्कजदलायतलोचनानाम् ॥ २ ॥

Iti vartamānaprakaraṇam; इति° गणसाम्यविन्यासः प्रथमः । fol. 62; *liṅlotprakaraṇam*, fol. 63; लिङादिविन्यासो द्वितीयः fol. 64; *yakprakaraṇam*, fol. 64*b*; *śvastanīprakaraṇam*, fol. 65*b*; सार्वधातुकविन्यासः तृतीयः, fol. 67; लिट्प्र° चतुर्थो विन्यासः, fol. 69; लुङ्प्र° पंचमो°, fol. 72; आत्मनेपदादिप्र° षष्ठो°, fol. 74*b*; सनादिप्र° सप्तमो°, fol. 80.

III. *Kṛidanta* begins:

नन्दनन्दनपदारविन्दयोः स्यन्दमानमकरन्दतुन्दिलः ।
व्यातनोतु पुरुषोत्तमः कृती सारवत्प्रकरणं कृतामिदम् ॥

कृतः कर्तरि । ° व्यवस्थाप्र°, fol. 81*b*; अयातृत्वादिप्र°, fol. 83*b*; स्वानुबन्ध°, fol. 84*b*; क्त्वादिप्र° कृत्सु चतुर्थो विन्यासः, fol. 90*b*; क्वादिप्र°, fol. 93.

It ends:

इति महामहोपाध्यायश्रीविद्यावागीशभट्टाचार्यपरनामश्रीपुरुषोत्तमशर्मनिर्मितायां प्रयोगरत्नमालायां कृत्सु षष्ठो विन्यासः समाप्तः ॥

Rāj. Mitra, Descript. Cat. i., p. 73, where another MS. of this work is noticed, refers to Martin's History of Eastern India, vol. iii., p. 136, where it is stated that *Purushottama* was a *Vaidika Brāhmaṇa* of *Vihār* in *Kāmarūpa*, and flourished in the time of *Mallanārāyaṇa*, Rājā of Coch Behar. This grammar is said to be much used in Assam and Eastern India generally.

[Sir C. Wilkins.]

---

* This stanza is omitted by the next MS.

896.

466. Foll. 202; size 16¾ in. by 4¼ in.; good, cursive, recent Bengālī handwriting; seven lines in a page.

Prayoga-ratnamālā.

The *ākhyāta* section begins fol. 121; the *kridanta*, fol. 167*b*.

It ends:

द्विजकुलकमलप्रकाशकैकभास्करमहामहोपाध्यायश्रीविद्या-वागीशभट्टाचार्यनिर्मितप्रयोगोत्तमरत्नमालायां कृत्सु षष्ठो वि-न्यासः सम्पूर्णः ॥ [H. T. COLEBROOKE.]

897.

2734. Foll. 142; size 16½ in. by 4½ in.; indifferent Bengālī handwriting; eight lines in a page.

The same work, without the *taddhita* and *kridanta* sections. There is some confusion in the order of the different sections.

a) Foll. 27–117 (numbered 1–93): from the beginning of the work to the end of the *Samāsa*; Dated Śaka 1706 (A.D. 1784).
b) Foll. 128–142. The first three, and beginning of the fourth, chapters of the verb.
c) Foll. 118–125. The end of the 4th, the 5th, and beginning of the 6th, chapters.
d) Foll. 1–14. The remaining portion of the *ākhyāta*. [SIR C. WILKINS.]

898.

1600d. Foll. 33; size 9¾ in. by 4¼ in.; good, large Devanāgarī handwriting of the earlier part of last century; seven lines in a page.

Prabodhacandrikā, an elementary treatise on grammatical subjects, in *anushṭubh ślokas*, composed by king *Vaijala Deva* for the benefit of his son *Hirūdhara*.

It begins:

हरिहरगुरुभक्तः सर्वलोकानुरक्तस्
त्रिभुवनगतकीर्तिः कांतकंदर्पमूर्तिः ।
रणरिपुगणकालो वैजलक्षोणिपालो
जगति जयति दाता सर्वकर्माधाता ॥ १ ॥
चंद्रावतीवदनचंद्रचकोरविक्र-
मादित्यदेवतनयो नयतंत्रवेत्ता ।
चौहानवंशतिलकः पुटनाधिनाथो (l. पट°)
राजा परं जयति वैजलदेवनामा ॥ २ ॥
रामो मेऽभिहितं करोतु सततं रामं भजे सादरं
रामेणापहृतं समस्तदुरितं रामाय दत्तं धनुः ।
रामान्मुक्तिरभीप्सिता सरभसं रामस्य दासोऽस्म्यहं
रामे रज्यतु मे मनः करुणया हे राम मां पालय ॥ ३ ॥
श्रीमद्वैजलदेवेन रामभक्तिरतात्मना ।
इति चिन्तितमेकांते कदाचित्तिष्ठता सता ॥ ४ ॥ ° ८ ॥
संसारांताधितरणं रामनामानुकीर्तनं ।
रामनामान्विता तस्मात्प्रक्रिया क्रियतां मया ॥ ९ ॥
बालकानां प्रबोधाय तोषाय विदुषामपि ।
आकल्पमपि संसारे कीर्त्यवस्थापनाय च ॥ १० ॥
चिंतयन्निति निर्यातः क्रीडंतं श्रीहिराधरं ।
श्रीमान्वैजलभूपालो विलोक्येत्यब्रवीत्सुतं ॥ ११ ॥
विद्यया द्योत्यते राज्यं विद्यया जीयते रिपुः ।
विद्यया ज्ञायते कृत्यं विद्यया लभ्यते यशः ॥ १२ ॥ ० १९ ॥
दानेन दयया चैव युद्धेन निजकर्मणा ।
दानवीरो दयावीरो युद्धवीर इति श्रुतिः ॥ २० ॥
दधीचिर्दानवीरोऽभूद्दयावीरः शिविर्नृपः ।
हम्मीरो युद्धवीरोऽभून्निदर्शनममी त्रयः ॥ २१ ॥ ° २४ ॥
एवं वदंतं पितरं विनीतः श्रीहिराधरः ।
कृतांजलिपुटो भूत्वा सव्रीडमिदमब्रवीत् ॥ २५ ॥
मातापितृभ्यां विरसं परिणामरसावहं ।
तिक्तं कटु कषायं वा भेषजं पाय्यते सुतः ॥ २६ ॥
श्रवणांजलिना पीतमुपदेशामृतं मया ।
आज्ञाप्यतां देव मया किमिदानीमधीयतां ॥ २७ ॥
श्रीमान्वैजलभूपालः श्रीहिराधरबालकं ।
सुपीय परितुष्टात्मा सुतमित्यवदत्पुनः ॥ २८ ॥

Having extolled grammar, as ensuring every success, the author begins with the cases and their grammatical value (*kartri*, etc.), illustrating the definition by examples:

तत्रोक्ते कर्तरि यथा रामो जयति वैरिणः ।
रणे रामौ च रामाश्च जयतश्च जयंति च ॥ ४० ॥
संबोधने ऽपि प्रथमा विभक्तिर्भवति ध्रुवं ।
यथा हे राम हे रामौ हे रामा इत्यनुक्रमात् ॥ ४१॥ ० ९० ॥

इति श्री - प्रबोधचंद्रिकायां च कृतौ वैजलभूपतेः ।
विभक्तिचंद्रिकामध्ये समाप्ता स्यादिचंद्रिका॥ fol. 8.

अथ त्यादिविभक्तीनामुदाहरणमुच्यते ।
त्रयः स्युः पुरुषास्त्यादेः प्रथममध्यमोत्तमाः ॥ १ ॥ ० ३० ॥

इति ० समाप्ता त्यादिचंद्रिका ॥ fol. 10.

अथ षट्कारकाणीह कथ्यंते कथितान्यपि ।
अर्थोद्यतो विभक्तीनां कारकत्वेन दर्शिताः ॥ १ ॥ ० ५५ ॥

इति ० समाप्ता सकलश्लाघ्या वरा कारकचंद्रिका ॥ fol. 14.

त्यादिभिस्तद्धितैः कृद्भिः समासैश्च विधीयते ।
यदेव कारकं तत्र प्रथमैव न वान्यतः ॥ १ ॥ ० ६५ ॥

इति ० इत्युक्तचंद्रिका सम्यक् समाप्तातिमनोहरा ॥ fol. 19.

समासः षड्विधो नाम्नां ज्ञेयस्तत्पुरुषस्तथा ।
कर्मधारे(य)संज्ञश्च बहुव्रीहिस्तथैव च ॥ १ ॥ ० ३९ ॥

इति ० समासचंद्रिका ज्ञेया समाप्ता विश्वकाशिनी॥fol.22.

तद्धितास्त्रिविधा ज्ञेयाः केचित्सामान्यवृत्तयः ।
केचिदव्ययसंज्ञाश्च केचिद्भावार्थवाचकाः ॥ २ ॥ ० ३९ ॥

इति श्रीप्रबोधचंद्रिकायां तद्धितचंद्रिका ॥ fol. 25.

कृतस्त्रिष्वपि वर्तंते भावे कर्मणि कर्तरि ।
तत्र भावे यथा रामो विजयो विनयस्तथा ॥ १ ॥ ० ३५ ॥

इति प्रबोधचंद्रिका समाप्तेयं सर्वाभीष्टार्थबोधिका ॥ fol.27.

अथ बालकबोधाय सम्यक्संधिर्विविच्यते ।
रामच्छत्रं हरिच्छाया विष्णुच्छत्र गुरुच्छविः ॥ १ ॥ ० ७० ॥

It ends:

इति श्री - प्रबोधचंद्रिकायां च कृतौ वैजलभूपतेः ।
एष विशेष सुष्ठु (!) समाप्ता संधिचंद्रिका ॥

For other MSS. of this work, see Aufrecht, Cat. Bodl., no. 370; Rāj. Mitra, Notices, viii., p. 12; Weber, Cat. Berl., no. 1635.

[H. T. Colebrooke.]

899.

828. Foll. 141 (numbered 1–142; no. 41 having been omitted by mistake); size 13 in. by 4½ in.; written in the Bengālī character, by different hands; in A.D. 1806; generally seven lines in a page.

Sārāvalī, a grammar in *sūtras*, with a *vritti*, by *Nārāyaṇavandyopādhyāya*. Complete in seven *pādas*.

I. Foll. 10. *Sandhi-pāda*, begins:

श्रीरामं जगतामीशं प्रणम्य तस्य तुष्टये ।
सारावलीं प्रतनुते श्रीलनारायणः सुधीः ॥

वृद्धिरादैजारालैजैचो ऽचः । अचः स्थाने आत् ऐच् आर् आल् ऐच् ऐच इत्येते आदेशा वृद्धिः परिभाष्यन्ते । अ इ उण् ऋ लक् ए ओङ् ऐ औच् प्रत्याहारार्थो ऽयं निर्देशस्तेनाजित्यनेन अ इ उ ऋ ऌ ए ओ ऐ औजितौ औ एवमन्ये । प्रत्याहारेषु ह्रस्वोक्त्या दीर्घो ऽपि गृह्यते । ०

II. Foll. 34. *Tiṅanta-pāda*, begins:

धातोस्तिङ् तस् अन्ति सिङ् थस् थ मिङ् वस् मस् ते आते अन्ते से आथे ध्वे ए वहे महे लड् वर्तमाने । वर्तमाने काले धातोः लट् संज्ञकास्तिङादयः स्युः । क्रियाधारः कालो वर्तमानः ।

It ends:

इति श्रीमन्नारायणवन्द्योपाध्यायकृतौ सारावल्यां द्वितीयः तिङन्तपादः समाप्तः ॥ नभस्यपञ्चदशदिवसे मन्दवारे ऽसितपक्षे प्रतिपदि तिथौ ग्रन्थसमाप्तिरिति । लिखितं श्रीकृष्णमोहनदेवशर्मणा । श्रीगुरुभरसामात्रः ।०

III. Foll. 24 (excellent writing). *Kṛidanta-pāda*, begins:

लड्लृट्च कृत् शतृशानौ ॥ धातोः कृत्संज्ञकौ शतृशानौ स्यातां तौ लड्वत् लृट्च । कृदित्यधिकारः । भवन् शयानः करिष्यन् करिष्यमाणः ॥ हेतुश्चिह्ने क्रियायाः ॥ भोक्ष्यमाणाः पश्यन्तो पश्चासीत् । क्रियाया इति किम् । यः पचति स चैत्रः ॥ ०

IV. Foll. 35. *Taddhita-pāda*, begins:

नाम्नो ऽतः स्त्रियामाप् तद्धितः ॥ स्त्रियां नाम्नो ऽतः परे तद्धितसंज्ञक आप् स्यात् । नाम्नस्तद्धित इत्यधिकारः । गङ्गा ॥ अजादेश्च । अजा अडका अश्वा चटका कोकिला मूषिका शूद्रा जाती कन्या बाला पाका वत्सा वयसि ज्येष्ठा कनिष्ठा उत्तमा गोपालिका पशुपालिका सूर्या देवी पुंयोगे ऽसिता पलिता त्रिफलेत्यादि ॥ ०

Dated: सन १२१३ सालशकाब्दा १७२८ । तारिख ११ भाद्रस्य समाप्तश्चायं ग्रन्थः ॥

V. Foll. 9. *Kāraka-pāda,* begins:

क्रिया मुख्यकर्तृ ॥ धात्वर्थः क्रिया । क्रियायां साध्यायां कारकेषु तदा योजनार्हत्वाद् यो मुख्यः स कर्तृसंज्ञः स्यात् । चैत्रः काष्ठैः स्थाल्यामोदनं पचति । ०

VI. Foll. 11. *Subanta-pāda,* begins:

सुपो लुगव्ययात् ॥ अव्ययात्परस्य लुक् स्यात् । चादि प्रादि स्वरादि ओमादि वदाद्यव्ययम् । प्रथमादिसप्तविभक्तीनां सुप्प्रत्याहारः । स्वस्तिश्रति ॥ अव्ययीभावादनदन्तात् ॥ अतिस्त्रि । अनदन्तात्तु । उपरामात् । ०

VII. Foll. 18 (by the same hand as III.). *Samāsa-pāda,* begins:

तत्पुरुषो नञः सुपा समासो वा ॥ सुबन्तेन सह नञस्तत्पुरुषसंज्ञकः समासो वा स्यात् । स स्वभावादुत्तरपदार्थप्रधानश्च । समासो वेत्यधिकारः । अनेकपदस्यैकपदवत्ता समासः । न ब्राह्मणो ऽब्राह्मणः ॥ ईषतो गुणिना ॥ ईषत्पिङ्गलः पटः । ईषदनुतः ॥ मानिना कालस्य ॥ ह्यहो जातस्य ह्यहजातः । ०

It ends:

इति वन्द्यघाटीय - श्रीनारायणवन्द्योपाध्यायकृतौ सारावल्यां सप्तमः समासपादः समाप्तः ॥

Fol. 1a has the title: रामनारायणवन्द्यकृतसारावलीव्याकरण १४२ पत्र अक्षर २४६५ ।

[H. T. Colebrooke.]

900.

802c. Foll. 81; size 16 in. by 5½ in.; recent Bengālī handwriting; eight lines in a page.

Kārikāvali, a versified grammar, by *Rāmanārāyaṇa,* son of *Krishṇarāma.*

It begins:

सिद्धिर्दं पुरुषार्थानां ज्ञानविज्ञानसाधनं ।
नारायणं नमस्कृत्य क्रियते कारिकावलिः ॥
पूर्वतन्त्राणि संलोच्य प्रयोगानुपलक्ष्य च ।
स्पष्टसंक्षेपसारोक्त्या पद्यैनेयं मयोच्यते ॥
अकारादिक्षकारान्ता वर्णाः पञ्चाशदीरिताः ।
संज्ञार्थमेषां व्यत्यासः प्राक्तनैरवधारितः ॥

पञ्चाशदिति जिह्वामूलीयोपध्मानीयप्लुतानां स्थानिरूपत्वात् ऌकारस्य तु भेदत्वेनाधिक्याभ्युपगमात् । व्यत्यासो यथा । अ आ इ ई उ ऊ ऋ ॠ ऌ ॡक् । ए ओङ् । ऐ औच् । ह य व र ल । ञ ण न ङ म । झ ढ ध घ भ । ज ड द ग ब । ख फ छ ठ थ(!) । च ट त क प । श ष स ॥

एषामाद्यन्ता नामानः संज्ञाः स्युरच्हसादयः ।
अन्त्यन्तं परिहायैव हसि तेन समन्विताः ॥
अको ह्रस्वाश्च दीर्घाश्च प्लुताश्चाचः प्रकीर्तिताः ।
अकां मिथः सवर्णत्वं स्याद् द्वयोर्ह्रस्वदीर्घयोः ॥ ०

The *saṃjñāpāda* ends fol. 2*b*; *ac-sandhi,* fol. 4; *visargasandhi,* fol. 6*b*; *shatvapāda,* fol. 8; *ṇatvādhikāra* and *sandhivṛitti,* fol. 9*b*; *ajantanāma,* fol. 12*b*; *hasantanāma,* fol. 15*b*; *tyadādināma,* fol. 16*b*; *stryadhikāra,* fol. 19*b*; *kārakavṛitti,* fol. 24*b*; *samāsapādau,* foll. 30 and 34*b*; *taddhitavṛitti,* fol. 45; *iñantapāda,* fol. 51*b*; *śapādyanta,* fol. 53*b*; *aśityādyanta,* fol. 57*b*; *dvitvap.,* fol. 58; *samprasāraṇap.,* fol. 59; *guṇap.,* fol. 59*b*; *imanta,* fol. 62*b*; *-kṛitsu prathamapādaḥ,* fol. 65*b*; *kṛityapāda,* fol. 66*b*; *ktvādyanta,* fol. 68; *upapadādhikāra,* fol. 71*b*; *kvansvādyanta,* foll. 74*b* and 77*b*.

It ends:

क्वचित्प्रवृत्तं क्वचिदप्रवृत्तं
क्वचित्परे ऽर्थे क्वचिदन्यथार्थे ।
विचिन्त्य शास्त्रं मुनिभिः प्रयुक्तं
चतुर्विधा बाहुलका भवन्ति ॥
अजनि धरणिमध्ये विश्वविश्रान्तकीर्तिः
कविकुलतिलकः श्रीकृष्णरामो ऽस्य सूनोः ।
इह विरतिमगच्छत् तस्य कृत्प्रत्ययानां
परिशेष इति कृते (!) श्रीरामनारायणस्य ॥

इति श्रीरामनारायणभट्टाचार्यचक्रवर्तिकृतायां कारिकावलौ कृत्सु क्वाद्यन्तपादः ॥

[H. T. Colebrooke.]

901.

805. Foll. 97; size 16 in. by 5½ in.; indifferent, recent Bengālī handwriting; eight lines in a page.

Kārikāvali-ṭīkā, a commentary on *Rāmanārāyaṇa's* grammar, by his son, *Rāmaprasāda Vidyālaṃkāra Bhaṭṭācārya.*

To the end of the *taddhitavṛitti.*

It begins :

प्रणम्य जानकीकान्तं सच्चिदानन्दविग्रहं ।
व्याख्यास्ये शब्दकूटार्थान् पित्रोक्तान् कारिकावलेः ॥

निर्विघ्नेन ग्रन्थसमाप्तिकामो भट्टाचार्यचक्रवर्ती श्रीरामनारायणः शास्त्रस्य वाचनिकत्वात् परमदेवतानुस्मरणपूर्वकं वाचा नमस्करोति सिद्धिरित्यादिना । ० । ग्रन्थस्य प्रामाण्ये हेतुमाह पूर्वेषामित्यादिना । पूर्वेषां पाणिन्यमरसर्ववर्मप्रभृतीनां तन्त्राणि व्याकरणानि संलोच्य सम्यगालोक्य प्रयोगान् श्रीरामायणमहाभारतश्रीमद्भाग[व]तादौ उपलभ्य दृष्ट्वा । इयं कारिकावलिः पद्येन श्लोकेन मयोच्यते कथ्यत इत्यर्थः ॥ ०

The *saṃjñāpāda*, ends fol. 8; *sandhi*, fol. 14*b*; *śabdavṛitti*, fol. 30; *kāraka*, fol. 48*b*; *samāsa*, fol. 89*b*. [H. T. Colebrooke.]

902.

803a. Foll. 89; size 15½ in. by 5½ in.; good, modern, Bengālī handwriting; eight lines in a page.

The remaining portion of *Rāmaprasāda's* commentary.

The *ākhyātavṛittivyākhyā* ends fol. 52*b*.

It ends :

विरुद्धं गुरुवाक्यानां मया यद्भाषितं क्वचित् ।
तत् क्षन्तव्यं बुधैः सम्यक् शब्दसिन्धुतितीर्षुभिः ॥

इति श्रीरामप्रसादविद्यालङ्कारभट्टाचार्यविरचितायां कारिकावलिटीकायां कृद्व्याख्या समाप्ता ॥

Then follow two passages, one from the *Vidagdhamukhamaṇḍana*, and the other as follows :

जितः सुचरितच्छेदी स्मरो ऽयं दुःसहो मया ।
इतीव देहमकरोदभिन्नं यः सहोमया ॥
इति कीचकयमकस्य ॥ ० ॥ नागरयोगकाव्यः ॥

[H. T. Colebrooke.]

903.

593b. Foll. 180; size 11 in. by 4½ in.; fairly written, in Devanāgarī, by two or three different hands, about A.D. 1700; 7–9 lines in a page.

Padacandrikā, an elementary versified Sanskrit grammar—chiefly based on the *Sārasvatī Prakriyā*,* with a commentary (*vṛitti*)—composed, under the auspices of prince *Narottama*, by *Krishṇa*, son (and pupil) of *Śesha Nṛisiṃhasūri*.

I. *Sandhi* and *Subanta*, begins :

नित्यानंदघनं सर्वकृत्तदितपरं परं ।
अस्तु वस्तु स्वस्तिकरं लीलानिर्मितविग्रहं ॥ १ ॥
भाष्यादेः सारमुद्धृत्य कृत्वा लक्षणकारिकाः ।
वर्तयिष्ये यथालक्ष्यं स्वतात्पर्यप्रमाणकं ॥ २ ॥
निर्णेतुं वक्तृतात्पर्यं स्यात्प्रमाणगवेषणा ।
वक्त्रोपदर्शिते तस्मिन् कुतर्कावसरः कुतः ॥ ३ ॥
अर्थप्रकरणाद्यालोचने स्याद्बोधगौरवं ।
प्रायो ऽस्मिन्नादृतं तेन स्पष्टार्थं शब्दगौरवे ॥ ४ ॥

विघ्नविघाताय गुरुदेवतैक्यमनुसंधत्ते ।

यच्चित्ता सूत्रसंचारमनुसृत्य सरस्वती ।
विद्वद्रंगे नरीनर्त्ति तं नृसिंहमहं भजे ॥ १ ॥

प्रवृत्तेः प्रयोजनविषयावाह ।

सूत्रवृत्तीष्टिवाक्यादिग्रंथग्रंथिश्रमच्छिदे ।
सुखबोधाय बालानां क्रियते पदचंद्रिका ॥ २ ॥

सूत्राणि पाणिन्यादेः । वृत्तयः काशिकाद्याः । इष्टयो भाष्यकारस्य । वाक्यानि वार्त्तिकानि । आदिपदात्प्रक्रियादयो ग्रंथास्तेषां ग्रंथिर्दुर्बोधो भागस्तत्र श्रमस्तद्धानाय । व्यवहारार्थं संज्ञा आह ।

अच् स्वराः ।

स्वराः प्रसिद्धाः स्वयं राजन्ते ० ॥ [ऽनेजक् । ० । इजवर्णास्ते । ० । परे तु हल् । ० । स्वरो

स्वरा एकद्वित्रिमात्रा ह्रस्वदीर्घप्लुताः क्रमात् । ० ।
ते ऽप्युदात्तानुदात्तत्वस्वरितत्वैस्त्रिधैकशः ।
शुद्धानुनासिकाभ्यां ते द्विधेत्यष्टादशादयः । ०
स्युः सवर्णाः सजातीया ऋलवर्णौ स्ववर्गजाः । ०

Fol. 5 इति संज्ञाः ॥

संधीछायां स्वरे ऽग्रस्ये इयंमुर्वम् रम् लं ।
इयं । दध्यत्र । उवं । मध्वत्र । ऋ रम् । पित्रर्थं । ऌ लं । लाकृतिः । ०

इत्यच्संधिः fol. 6*b*; इति प्रकृतिभावः fol. 7*b*; इति

---

* Colebrooke, Misc. Essays, 2nd ed., p. 41, makes it a commentary on the *Sārasvata*.

हल्संधि: fol. 10b; इति विसर्गसंधि: fol. 11b; इति षत्वणत्वप्रकरणं fol. 14; इत्यजंता: पुल्लिंगा: fol. 20, etc.; इति ० स्याद्यंतविवेक: समाप्त: fol. 109.

II. *Tiñanta* (with which a new paging commences) begins:

धातोस्तिङः कर्मकर्त्रोर्भावकर्त्रोस्त्वकर्मकात् ।
वक्ष्यमाणास्तिङो धातोः स्युस्ते च सकर्मकात्कर्मणि कर्तरि च अकर्मकात्तु भावे कर्तरि च स्युः । लट् लिङ् लोट् ०

पंचाद्याः शिच्च मार्वे स्युराधेधातोः कृताः परे । ०

III. *Kridanta*, fol. 50b (of 2nd part):

अथ कृत कर्तरि ।
इत ऊर्ध्वं वक्ष्यमाणः प्रत्ययः कृत्संज्ञः स्यात्स च कर्त्रर्थे ।
प्रातः (प्रा)कृत्यो भावकर्मणोः ।
आतृविधेः वक्ष्यमाणात्प्रत्ययः कृत्संज्ञः स्यात्स च कर्त्रर्थे ।
प्राकृत्यो भावकर्मणोः । आतृविधेः कृत्संज्ञो ऽपि स्यात्०

The MS. ends with four couplets, the last three of which run thus:

यत्कृपालेशतो ऽज्ञे ऽपि जृम्भते मयि वाङ्मयं ।
नृसिंहं नौमि शर्माकं देवतं पितरं गुरुं ॥
अस्ति विश्वंभराभोगभूषणीभूतवैभवः ।
नरोत्तमस्तमस्तोमराजिनाशिलसद्यशाः ॥
आपूर्वापर|वा|रिराशिवसुधासाम्राज्यदीक्षागुरोर्
आदेशेन नरोत्तमक्षितिपतेः श्रीशेषकृष्णेन्दुना ।
विन्यस्तास्तसमस्तदोषतिमिरा विद्वच्चकोरादराद्
आचंद्रं पदचंद्रिका कुवलयानन्दाय भूयादियम् ॥

इति श्रीमच्चतुरुदधिपर्यंतवसुंधराधुरंधरश्रीमद्राजनरोत्तमादिष्टश्रीशेषनृसिंहसूरितनयकृष्णविरचितायां पदचंद्रिकायां कृदंतविवेकः समाप्तः ॥

The same author wrote the *Prākritacandrikā* (see no. 945). [H. T. COLEBROOKE.]

904.

727. Foll. 155; size 13 in. by 4 in.; good, clear, recent Bengālī handwriting; seven lines in a page.

Prakriyārṇava, another grammatical manual, in *sūtras* with a *vritti*, by *Madanapañcānana*. The author has adopted most of *Vopadeva's* grammatical terms, and many of his *sūtras*. The aphorisms of the *Kātantra* (and probably other grammars) have also been laid under contribution. The MS. begins:

सरस्वतीं नमस्कृत्य शिशुधीवृद्धिहेतवे ।
समाहृत्यान्यतन्त्राणि करोमि प्रक्रियार्णवं ॥

सिद्धो वर्णसमाम्नायः ॥ सिद्धः खलु वर्णानां समाम्नायो वेदितव्यः । न पुनरन्यथोपदेष्टव्यः* । वर्णा अकारादयस्तेषां समाम्नायपाठक्रमः । ० ॥ तत्रादौ चतुर्दश स्वराः ॥ ० ॥ पूर्वो ह्रस्वः परो दीर्घः ॥ कादीनि व्यञ्जनानि ॥ ० ॥ अन्तस्था यरलवाः ॥ ०

The *taddhitaprakriyā* (and *subanta*) ends fol. 71b; the *ākhyātaprakriyā*, fol. 126b.

It ends: इति कृदन्तप्रक्रिया समाप्ता ।

व्याकरणं मया तेने प्रक्रियार्णवसंज्ञकं ।
मदनाख्यद्विजेनेदं समाहृत्यान्यतन्त्रकं ॥

श्रीकीर्त्तिनारायणशर्मणः स्वाक्षरं ॥ ०

[H. T. COLEBROOKE.]

905.

222. Foll. 156; size 15¼ in. by 5 in.; fair, recent Bengālī handwriting; seven lines in a page.

Jñānāmrita, another elementary Sanskrit grammar, composed in Saka 1660 (A.D. 1738), by *Kāśīśvara Śarman*, son of *Rāmanārāyaṇa* and *Bhavānī*.

It begins:

काशीश्वरं भगवतीं प्रणिपत्य वाचं
ज्ञानामृतं त्वरितविभ्रमबुद्धिबोध्यं ।
काले दुरन्तचरिते तनुलोकबोधे
काशीश्वरो वदति वैदिकपौतमास्यः ॥
चतुर्दशाचतुस्त्रिंशत्कादिसर्गानुकार्पकं ।
वर्णमुक्तं तदाद्यन्तनाम कार्यानुसारतः ॥

अइउण् ऋॡक् एओऐऔच् ॥ इत्यच् तन्त्रसारे तथा च
नामाङ्कलादकठवाङ्गजभुक्तशेषं
ज्ञात्वोभयोरधिकशेषमृणं धनं स्यादिति ।

---

* Cf. the beginning of the *Kātantra*, and *Durgasimha's Vritti*.

अश्च आश्चेति इश्च ईश्चेत्यकि समाहाराचतुर्दशाच् । कादिहान्ताश्चतुस्त्रिंशत् । विसर्गः सर्गे आगमे स तु उपर्यधःस्थितबिन्दुद्वयरूपः । अनुस्तुस्वारः स तु वर्णान्तमूर्ध्वस्थित एकबिन्दुरूपः । ✕क इति जिह्वामूलीयः ✕प इत्युपध्मानीयः । तौ यथा

अधोविरेखयुक्तायामा एव द्वयरूपकः ।

जिह्वामूलीय इत्येव गजकुम्भोपमो ऽपरः ॥

एतत् सर्वं वर्णसंज्ञं स्यात् । तत आद्यन्तवर्णद्वयघटितं नाम स्यात् । ०

इति ० संज्ञाकदम्बपादः fol. 15; इति संधिः fol. 25; इति मत्वसंक्षेपः fol. 29; इति श्रीकाशीश्वरशर्ममनैनिभृतज्ञानामृते सङ्करः संज्ञासंधिकमत्वणत्वघटितो ऽध्यायो ऽयमाद्यो गतः fol. 32*b*.

The *nāma* portion ends fol. 60; the *samāsa*, fol. 83.

The *ākhyāta* begins: अथाख्यातं । तत्रादावाकृतिगणगणाः ॥ घटादि । ज्ञा मारल्लोकस्तुतितोषनिशामने । श्रा पाके ०

The *krit*, fol. 130*b*: अथ कृद्वहुलं । ०

The *taddhita*, fol. 145*b*.

It ends:

श्रीमद्राघवपण्डितात्मजवरश्रीमद्घनश्यामजो
धर्मे निष्ठितमानसो मुनिरिव श्रीरामनारायणः ।
तत्पुत्रो ऽहमकुर्वि तत्पदि हृदा मातुर्भवान्याः स्मरन्
शाके खर्तुनृपे प्रबन्धसुधया ज्ञानामृतं पूरणं ॥

शकाब्दाः १७२७ । सप्ताक्षिमुनिभूशाके नत्वा कालीपदाम्बुजं ।
अलिखत्पुस्तकं शुभ्रं श्रीमान् रामनिधिर्द्विजः ॥

[H. T. COLEBROOKE.]

906.

1463. Foll. 170; size 9 in. by 3¾ in.; fairly written, in Devanāgarī, about the middle of the last century; seven lines in a page.

Bhāvasiṃha-prakriyā, an elementary, explanatory grammar, composed by *Bhaṭṭa Vināyaka*, son of *Bhaṭṭa Govindasūri*, for *Bhāvasiṃha*, eldest son of *Medinīrāja*.

The *sandhi-*,and *subanta* sections. It begins:

रघुपतिमहमीडे भावसिंहासनस्थम्
अनुजयुगलमेकत्रापरस्मिन्दधानं ।
दशमुखरणबीजां जानकीं चानुजं चा-
निमिषमनिलसूनुं मंत्रमग्रे ऽभ्यसंतं ॥ १ ॥

Three more stanzas have been blotted out; the first of which seems to run thus:

ये - - - दशरथगृहे क्षत्रियाः प्रादुरासन्
नूनं तेषामनुकृतिरिमे मेदिनीराट्क्षितीशात् ।
तेषां मध्ये गुणसुखरतिख्यातिमान्भैष्णवाद्यम्
तत्तुष्ट्यर्थं व्यरचि रुचिरा प्रक्रिया भावसिंही ॥ २ ॥ ० ४॥

अ इ उण् ० हल् इति माहेश्वराणि प्रत्याहारसूत्राणि ॥ एषु च सन्ध्यकरणमसंदेहार्थं । छंदोवत्सूत्राणि भवंतीति वचनाच्छांदसो विभक्तिलोपश्च । णादयः प्रत्याहारार्थाः । ०

